## ।। प्रकरणम्-६ ।।

# ।। पुराणेषु सांख्ययोगवेदान्तविमर्शः ।।


| क्रमः | विषयनाम | पृष्ठक्रमाङ्कः |
|---|---|---|
| ६.१ | प्रस्तावना । | 324-336 |
| ६.२. | पुराणेषु इन्द्रियसर्गः । | |
| ६.३ | पुराणेषु शून्यवादनिरासः । | |
| ६.३.१ | शिवपुराणे शून्यवादनिरासः । | |
| ६.३.१ | श्रीमद्भागवतमहापुराणे शून्यवादनिरासः । | |
| ६.४ | पुराणेषु गतिकर्मबन्धकारणतानिरासः । | |
| ६.५ | पुराणेषु अविद्याखण्डनम् । | |
| ६.६ | पुराणेषु सृष्टिप्रयोजनम् । | |
| ६.७ | पुराणेषु विवेककृतकृत्यता । | |
| ६.७.१ | श्रीमद्भागवतमहापुराणे विवेककृतकृत्यता। | |
| ६.७.२ | श्रीविष्णुपुराणे विवेककृतकृत्यता । | |

## प्रकरणम् ६ पुराणेषु सांख्ययोगवेदान्तविमर्शः ।

### ६.१ प्रस्तावना ।

**दोषाणां च गुणानां च प्रमाणं प्रविभागतः ।**
**कञ्चिदर्थमभिप्रेत्य सा संख्येत्युपधार्यताम्**[१] ।।

परतत्त्वस्वरूपप्रदर्शनाय प्रवृत्तेषु दर्शनेषु कपिलमुनिप्रणीतस्य सांख्यदर्शनस्यापि मुख्यं स्थानमिति सर्व एव दार्शनिका अभ्युपगच्छन्ति । दार्शनिकानां पन्थानः कामं विभिन्ना भवेयुः, किन्तु वेदमूलकत्वेन सर्वेषां दर्शनानाम् एकरूपत्वसाधनं दुष्करं नास्ति । कपिलकणादगौतमव्यासजैमिनि- पतञ्जलीनां महर्षीणां चिन्तनशक्त्यतिशयप्रसूतानीमानि दर्शनानि विभिन्नमार्गगामीनि सन्ति, तथापि अज्ञातार्थज्ञापकत्वेन तुल्यं प्रामाण्यमश्नुवते । सुखदुःखमोहात्मकसत्त्वरजस्तमोरूपं प्रधानं जगत्कारणमिति प्रक्रिया स्थितिसिद्धान्तापरपर्याया सांख्यैः पुरुष इति ब्रह्मविद्भिरीश्वर इति पातञ्जलैः परमाणव इत्यौलूक्यैरादिशब्दात् तत्कार्यं जगदिति यथाक्रमं सांख्यादिभिः प्रतीताः प्रतिगताः प्रतिज्ञाताः स्वीकृताश्च विद्यन्ते ।

एवंभूतं सांख्यदर्शनं दर्शं दर्शं मम महाशोधस्य ‘पुराणेषु सांख्ययोगवेदान्तविमर्शः’ इति विषयं ध्यायं ध्यायं मम महाशोधनिबन्धस्य षष्ठे प्रकरणे ‘इन्द्रियसर्गः, शून्यवादनिरासः, गतिकर्मबन्धकारणतानिरासः, अविद्याखण्डनम् सृष्टिप्रयोजनम् , विवेककृतकृत्यता’ एतेषां षण्णां विषयाणां यथामति यथाशक्ति

[1] सांख्यकारिका-प्रस्तावना- पृ. सं. ७

निरूपणं विवेचनं व्याख्यानं च क्रियते, इदं प्रसन्नगभीरं सांख्याभिमतं पञ्चविंशतितत्त्वानां निरूपणपरं यथापुराणं विमर्शं करोमि, तस्य सांख्यदर्शनस्य भारतीयसाहित्ये येषु दार्शनिकेषु ग्रन्थेष्वध्यात्मचेतना प्रकटिता, तेषु सांख्यकारिकाणां विशेषं स्थानमस्ति , ताः सर्व्वाः कारिका हृदि निधाय प्राणिनां दुःखनिवृत्तये वर्तन्ते, तत् सांख्यदर्शनशास्त्रीयं शोधकार्यं करोमि तद्यथा –

६.२. पुराणेषु इन्द्रियसर्गः ।

**बुद्धीन्द्रियाणि चक्षुःश्रोत्रघ्राणरसनत्वगाख्यानि ।**
**वाक्पाणिपादपायूपस्थानि कर्मेन्द्रियाण्याहुः[१] ।।**

सांख्यदर्शनस्यानुसारमेकादशेन्द्रियाणि सन्ति, इन्द्रस्यार्थो भवति यद् – आत्मचिह्नम् , अत इन्द्रियाणि करणानि सन्ति, कर्तारं विनेन्द्रियाणि कामपि क्रियां कर्तुं न शक्नुवन्ति । आचार्य ईश्वरकृष्णः स्वीकरोति यद् – वैकृतादहंकारात्सत्त्वप्रधानानाम् इन्द्रियाणां समुत्पत्तिर्भवति, किन्तु विज्ञानभिक्षुः स्वीकरोति यद् – वैकृतादहंकाराद् सत्त्वप्रधानानाम् मनसः समुत्पत्तिर्भवति, तथा च स्वीकरोति यद् – राजसादहंकाराद् दशानामन्येषाम् इन्द्रियाणां समुत्पत्तिर्भवति, सर्वप्रथमं श्रीमद्भागवतपुराणम् इन्द्रियसर्गस्य निरूपणमनेन प्रकारेण करोति तद्यथा –

**महाभूतानि पञ्चैव भूरापोऽग्निर्मरुन्नभः ।**
**तन्मात्राणि च तावन्ति गन्धादीनि मतानि मे।।**
**इन्द्रियाणि दश श्रोत्रं त्वग्दृग्रसननासिकाः ।**

---

1 सांख्यकारिका-२६

**वाक्करौ चरणौ मेढ्रं पायुर्दशम उच्यते ॥**
**मनो बुद्धिरहंकारश्चित्तमित्यन्तरात्मकम् ।**
**चतुर्धा लक्ष्यते भेदो वृत्त्या लक्षणरूपया ॥**
**एतावानेव संख्यातो ब्रह्मणः सगुणस्य ह ।**
**सन्निवेशो मया प्रोक्तो यः कालः पञ्चविंशकः[१] ॥**

अनेन प्रकारेण सर्वेषु पुराणेषु श्रीमद्भागवतपुराणमिव इन्द्रियसर्गस्य वर्ण्णनं कृतमस्ति, विस्तारभयादिदमुपप्रकरणमत्रैव समाप्नोमि ।

**६.३ पुराणेषु शून्यवादनिरासः ।**

**अपवादमात्रमबुद्धानाम्[२] ॥**

६.३.१ शिवपुराणे शून्यवादनिरासः ॥

शिवपुराणे शून्यवादनिरासस्य वर्ण्णनं कुर्व्वाणो शिवपुराणकारः श्रीव्यासो लिखति यद् -

**सर्वशून्यं निरालम्बं स्वरूपं यत्र चिन्त्यते ।**
**अभावयोगः स प्रोक्तो येनात्मानं प्रपश्यति[३] ॥**

शिवपुराणकारः कथयति यद् - यत्र सर्वशून्यस्य निरालम्बस्वरूपस्य चिन्तनं भवति, स एवाभावयोगः कथितो वर्तते, तेनैव कश्चित्साधक आत्मानमवलोकयितुं शक्नोति,

---

1 श्री. भा. पुराणम्-३।२६।

2 सांख्यप्रवचनभाष्य-१-४५

3 शिवपुराणम्- ७।२।७३

६.३.१ श्रीमद्भागवतमहापुराणे शून्यवादनिरासः ।।

श्रीमद्भागवतमहापुराणे शून्यवादनिरासस्य वर्ण्णनं कुर्व्वाणो श्रीभगवान् स्वयं लिखति यद् -

**तदा पुरुष आत्मानं केवलं प्रकृतेः परः ।**
**निरन्तरं स्वयंज्योतिरणिमानमखण्डितम् ।।**
**ज्ञानवैराग्युक्तेन भक्तियुक्तेन चात्मना ।**
**परिपश्यत्युदासीनं प्रकृतिं च हतौजसम् ।।**
**न युज्यमानया भक्त्या भगवत्यखिलात्मनि ।**
**सदृशोऽस्ति शिवः पन्था योगिनां ब्रह्मसिद्धये[1] ।।**

इत्थं सर्व्वेषु पुराणेषु विशेषरूपेण चर्चा कृता वर्तते, विस्तारभयादत्र न चर्चां न करोमि ।

६.४ पुराणेषु गतिकर्मबन्धकारणतानिरासः ।।

**न गतिविशेषात् ।।**
**निष्क्रियस्य तदसम्भवात्[2] ।।**
**न कर्मणाऽप्यतद्धर्मत्वात्[3]।।**

गतिकर्मबन्धस्य कारणस्य विषयेऽनेकेषामाचार्य्याणां मतमिदमनुसरन् सांख्यकारिकाकारः कथयति यत् - शरीर आत्मनः प्रवेशादिरूपे गतिविशेषेणापि पुरुषस्य बन्धो भवितुं नार्हति, अतः सूत्रमिदं प्रवर्तते यथा -

---

1 श्री. भा. पुराणम्- ३।२५।१७-१९

2 सांख्यप्रवचनभाष्य-१-४८-४९

3 सांख्यप्रवचनभाष्य-१-५१

**पुण्येन स्वर्गं याति ।**

**पापेन नरकं याति ।**

आत्मपुरुषो निष्क्रियो वर्तते, तस्य गतिर्भवितुन्नार्हति, इममेव गतिकर्मबन्धकारणतानिरासं कुर्व्वत्सु सर्वेषु पुराणेषु सर्व्वप्रथमं श्रीमद्भागवतमहापुराणे श्रीभगवान् स्वयं लिखति यद् -

**बद्धो मुक्त इति व्याख्या गुणतो मे न वस्तुतः ।**
**गुणस्य मायामूलत्वान्न मे मोक्षो न बन्धनम्।।**
**शोकमोहौ सुखं दुःखं देहापत्तिश्च मायया ।**
**स्वप्नो यथाऽऽत्मनः ख्यातिः संसृतिर्न तु वास्तवी।।**
**विद्याविद्ये मम तनू विद्ध्युद्धव शरीरिणाम्।**
**मोक्षबन्धकरी आद्ये मायया मे विनिर्मिते[१] ।।**

इत्थं सर्व्वेषु पुराणेषु विशेषरूपेण चर्चा कृता वर्तते, विस्तारभयादत्र न चर्चां न करोमि ।

६.५ पुराणेषु अविद्याखण्डनम्।

समानः प्रकृतेर्द्वयोः[२] ।।

अचेतनम्पदार्थस्याधिष्ठाता वर्तते, अनेन कारणेन सांख्यदर्शनो मन्यन्ते यत् - सृष्टेरुपादानकारणस्य परम्परा अचेतनमूलायां प्रकृतावेव समाप्ता भवति, अतो वादिनां प्रतिवादिनां कृते प्रकृतेरुपादानतायाः पक्षः समानो वा साधारणो विद्यते,

---

1 श्री. भा. पुराणम्- ११।११।१-३

2 सांख्यप्रवचनभाष्य-१-६९

कथनस्यास्याभिप्रायो वर्तते यत् - प्रकृतेरुत्पत्तेः श्रवणम्भवति, श्रीविष्णुपुराणकारः कथयति यथा -

**तमो मोहो महामोहस्तामिस्रो ह्यन्धसंज्ञितः ।**
**अविद्या पञ्चपर्व्वैषा प्रादुर्भूता महात्मनः ।।**
**पञ्चधावस्थितः सर्गो ध्यायतो प्रतिबोधवान् ।**
**बहिरन्तोऽप्रकाशश्च संवृतात्मा नगात्मकः[१] ।।**

अत्र श्रीपराशरः स्व्यमेव कथयति यद् - पञ्चपर्व्वात्मिकाया अविद्याया उत्पत्तिर्ब्रह्मणा कृता वर्तते, तासां सर्व्वासां पञ्चानां वृत्तीनां नामान्यनेन प्रकारेण सन्ति तद्यथा -

१. अज्ञानम् ।
२. मोहः ।
३. महामोहः (भोगस्येच्छा) ।
४. तामिस्रः (क्रोधः) ।
५. आन्धतामिस्रः (आसक्तिः) ।

अविद्यास्मितारागद्वेषाभिनिवेशाः पञ्च क्लेशाः पातञ्जलयोगसूत्रे कथिता वर्तन्ते, इत्थं सर्व्वेषु पुराणेषु विशेषरूपेण चर्चा कृता वर्तते, विस्तारभयादत्र न चर्चां न करोमि ।

## ६.६ पुराणेषु सृष्टिप्रयोजनम् ।

विमुक्तमोक्षार्थं स्वार्थं वा प्रधानस्य ।।
विरक्तस्य तत्सिद्धेः[२] ।।

---

[1] श्री. भा. पुराणम्- १।५।५-६

[2] सांख्यप्रवचनभाष्य-२-१।२

विकारं प्रकृतिं वा सनातनं पुरुषं यो जानाति, स वितृष्णो भूत्वा विमुक्तो भवति, अनेन कारणेन पुरुषस्य कृते मोक्षलाभाय भोगलाभाय च प्रकृतिः स्वकार्याय प्रवर्तते । एकवारं सृष्टिसर्जनेन मोक्षो न भवति, किन्तु नैकवारं जन्ममरणव्याध्यादिभिर्विविधैर्दुःखैरत्यन्ततप्तः सन् विरक्त एव मोक्षधर्मं प्राप्नोति, कथनस्याभिप्रायो वर्तते यत् प्रकृतिपुरुषौ विवेकख्यातिज्ञानेन समुत्पन्नतीव्रवैराग्यो जन एव मोक्षधर्मं प्राप्नोति, भक्तिविषयं विस्तारयन् नारदभक्तिसूत्रस्य सूत्रमिदं विषयमिममनेन प्रकारेण स्पष्टीकरोति तद्यथा –

**तत्तु विषयत्यागात्सङ्गत्यागाच्च**[१] ॥

सूत्रेऽस्मिन् परमां भक्तिं विधातुं विषयत्यागः सङ्गत्यागश्च परमावश्यकः, एतदेव सूत्रमिदं परामृशति, भक्तेः प्रेमरूपत्वाल्लौकिकविषयाणां वस्तुप्रेम्णोऽपि तदभिन्नत्वात्कुतः भक्तिसाधनम् ? तस्मादेव नारम्भरणीयमिति कुतर्कोपशमनाय नारदीयभक्तिसूत्रेऽस्मि् 'तु' इति शब्दः प्रस्थापितो वर्तते, विषया जीवान् कुत्र नयन्ति ? इति श्लोका एते कथयन्ति तद्यथा –

**न जातु कामः कामानामुपभोगेन शाम्यति ।**
**हविषा कृष्णवर्त्मेव भूय एवाभिवर्तते**[२] ॥
**तस्मादसदभिध्यानं यथा स्वप्नमनोरथम् ।**
**हित्वा मयि समाधत्स्व मनो मद्भावभावितम्**[३] ॥

---

1 नारदभक्तिसूत्रम् पृ. सं. ४८

2 मनुस्मृतिः ११।९४

3 श्री. भागवतम् ११।१४।२८

**गन्धान्नसान्नानुरुन्ध्यात्सुखं वा**
**नालङ्कारांश्चाप्नुयात्तस्य तस्य ।**
**मानं च कीर्तिं च यशश्च नेच्छेत्**
**स वै प्रचारः पश्यतो ब्राह्मणस्य[१] ।।**
**त्यागः स्नेहस्य यत्त्यागो विषयाणां तथैव च[२] ।।**

अतोऽल्पीयस्यां वा क्षणभङ्गुरायां कामवासनायां भगवल्लाभो भवितुन्नार्हति, श्रीविष्णुपुराणं श्रीमद्भागवतपुराणं च सृष्टिप्रयोजनं सृष्टिविस्तारस्य तृतीयस्कन्धस्य द्वादशेऽध्याये कथयति तद्यथा –

**धर्मश्चतुष्पान्मनुजान्कृते समनुवर्तते ।**
**स एवान्यष्वधर्मेण व्येति पादेन वर्धता ।।**
**त्रिलोक्या युगसाहस्रं बहिराब्रह्मणो दिनम् ।**
**तावत्येव निशा ता यन्निमीलति विश्वधृक्[३] ।।**
**पृथिव्यापस्तया तेजो वायुराकाशमेव च ।**
**सर्व्वेन्द्रियान्तःकरणं पुरुषाख्यं हि यज्जगत्।।**
**स एव सर्व्वभूतेशो विश्वरूपो यतोऽव्ययः ।**
**सर्गादिकं ततोऽस्यैव भूतस्थमुपकारकम् ।।**
**स एव सृज्यः स च सर्गकर्ता स एव पात्यत्ति च पाल्यते च ।**
**ब्रह्माद्यवस्थाभिरशेषमूर्तिविष्णुर्वरिष्ठो वरदो वरेण्यः[१] ।।**

---
1 महाभारतम् शान्तिपर्व १२।१८०

2 महाभारतम् शान्तिपर्व १९७।१७

3 श्री. भागवतम् ३।१२।२१-२२

इत्थं सर्व्वेषु पुराणेषु विशेषरूपेण चर्चा कृता वर्तते, विस्तारभयादत्र न चर्चां न करोमि ।

६.७ पुराणेषु विवेककृतकृत्यता ।

विवेकान्निःशेषदुःखनिवृत्तौ कृतकृत्यता नेतरान्नेतरात्[2] ।।

विवेकज्ञानेनैव समस्तानां त्रिविधानां दुःखानां निःशेषसमाप्तिर्भवति, तथा च कृतकृत्यतपूर्णां सफलतामवाप्नोति, जीवानां कृते विषयमिमं विहाय नान्यः पन्था विद्यते । संसाररूपां मायां तितीर्षुर्भक्तः सकलान्यपि कर्मफलानि परित्यजेत् , कर्मफलं त्यक्त्वा संन्यासस्याश्रयः कर्तव्यः, संन्यासो नाम त्यागः समर्पणं च भवति, तत्र कर्माणि द्विविधानि सन्ति, तेषु निषिद्धकर्माणि काम्यकर्माणि सर्वथा त्याज्यानि, किन्तु नित्यनैमित्तिकानि सकलान्यपि कर्माणि कर्तव्यानि, तानि कर्माणि कृत्वा तेषां फलं भगवते निवेदयेत् , किन्तु सकलः कर्मत्यागः शक्यो नास्ति यथा –

**न हि देहभृता शक्यं त्यक्तुं कर्माण्यशेषतः**[3] **।।**

**देहवान् न ह्यकर्मभृत्**[4] **।।**

**यज्ज्ञात्वा मत्तो भवति, स्तब्धो भवति, आत्मारामो भवति**[5] **।।**

---

1 श्रीविष्णुपुराणम् १।२।६६-६८

2 सांख्यप्रवचनभाष्य-३-८४

3 श्री. गीता १८।११

4 श्रीमद्भागवतम् ६।१।४४

5 नारदभक्तिसूत्रम् ६

स भक्तः भक्तिं कृत्वाऽऽनन्दान्वितो भवति, स्तब्धो नाम शान्तो भवति तथा चाऽऽत्मनि स्वयमेव रमते नामाऽऽत्मारामो भवति, भक्तिस्तु मनुष्यस्य हृदये स्वाभाविकरूपेण भवति, कुत्रापि गवेषणेन सा न प्राप्यते, प्रेमैव प्राणिनां सहजः स्वभावो वर्तते, तेषु कश्चिद्देहभक्तः, कश्चित्पत्नीभक्तः, कश्चित्पुत्रभक्तः, कश्चिद्देशभक्तः, अतो भक्तिं विना कस्यापि हृदयं भवितुन्नार्हति, किन्तु मनुष्यः स्वस्य हृदयस्य भक्तिं यत्र कुत्रापि संयोजयति, सम्यज्ज्ञानम्भवति, तदा सैव भक्तिर्भक्तान् भगवतः समीपे प्रापयति, इतो यावत् श्रीतुलसीदासः कथयति यद् –

**मुनि मग माहिं अचल होइ वैसा ।**
**पुलक सरीर पनसफल जैसा**[१] **।।**

इत्थं यावद्यद् – मुनयो यदाऽऽह्वानं कुर्वन्ति, तदा मर्यादापुरुषोत्तमः श्रीरामः स्वयमेव मुनीनां समीपं गच्छति, तत्र नैकान्युदाहरणानि सन्ति, यद् – विवेकज्ञानेनैव भगवान् स्वयमेव दर्शनं प्रदाय संसारबन्धनान्मुञ्चति ।

६.७.१ श्रीमद्भागवतमहापुराणे विवेककृतकृत्यता ।

तथैव श्रीमद्भागवतपुराणकारोऽपि षष्ठे स्कन्धे विवेकज्ञानमनेन प्रकारेण प्रशंसति यथा –

**श्रीमद्भागवतं पुराणतिलकं यद्वैष्णवानां धनं**
**यस्मिन्पारमहंस्यमेवममलं ज्ञानं परं गीयते ।**
**यत्र ज्ञानविरागभक्तिसहितं नैष्कर्म्यमाविष्कृतं**

1 रामचरितमानस

**तच्छृण्वन्प्रपठन् विचारणपरो भक्त्या विमुच्येन्नरः[१]।।**

**सकलभुवनमध्ये निर्धनास्तेऽपि धन्या**

**निवसति हृदि येषां श्रीहरेर्भक्तिरेका ।**

**हरिरपि निजलोकं सर्वथातो विहाय**

**प्रविशति हृदि येषां भक्तिसूत्रोपनद्धः[२]।।**

**भक्तेषु गोविन्दसरूपकर्त्री**

**प्रेमैकधर्त्री भवरोगहन्त्री ।**

**सा त्वं च तिष्ठस्व सुधैर्यसंश्रया**

**निरन्तरं वैष्णवमानसानि[३] ।।**

अनेन प्रकारेण सर्वाणि शास्त्राणि विवेकज्ञानं स्तुवन्ति, अयमपि श्लोकः कथयति यद् -

**सर्वयोगमयी शैली भवरोगविखण्डिनी ।**

**चिरं सर्वकषा जीव्यादखण्डानन्दधीमताम् ।।**

**यत्र चन्द्रसहस्रस्य सूर्यकोटेस्तथाकरः ।**

**नापेति यत्र तत्र वागेति ह्यखण्डानन्दसम्भवा।।**

**मलं क्षालयति क्षिप्रं विक्षेपं संक्षिणोति च ।**

**आविर्भावयति प्रेष्ठं भावितं भक्तिदर्शनम्[४] ।।**

---

1 श्री. भा. मा. १२।१३।१८

2 श्री. भा. मा. ६।७३

3 श्री. भा. मा. ६।७१

4 नारदभक्तिदर्शन-सूत्रसंख्या ८४

इत्थं विवेकज्ञानभावितानां नैकेषां चरित्राणि दर्शं दर्शं ध्यायं ध्यायं च कथयितुं शक्यते यद् – भक्तिं विनां परमात्मनः समीपं गन्तुं मानवानां पार्श्वे एकोऽपि पन्था न वर्तते ।

६.७.२ श्रीविष्णुपुराणे विवेककृतकृत्यता ।

तथैव श्रीविष्णुपुराणकारोऽपि प्रथमांशस्य चतुर्थाध्याये विवेकज्ञानमनेन प्रकारेण प्रशंसति यथा –

**निमित्तमात्रमेवासीत्सृज्यतां सर्गकर्मणि ।**

**नीयते तपतां श्रेष्ठ स्वशक्त्या वस्तु वस्तुताम्[1] ।।**

अनेन प्रकारेण मम शोधमहानिबन्धस्य 'पुराणेषु सांख्ययोगवेदान्तविमर्शः' इति नामके षष्ठे प्रकरणेपुराणेषु इन्द्रियसर्गः, पुराणेषु शून्यवादनिरासः, पुराणेषु गतिकर्मबन्धकारणतानिरासः, पुराणेषु अविद्याखण्डनम् , पुराणेषु सृष्टिप्रयोजनम् , पुराणेषु विवेककृतकृत्यता – इत्यादीनां विषयाणां सर्व्वाणि पुराणान्यालोड्य विमर्शः कृतो वर्तते, विस्तारभयादत्र षष्ठं प्रकरणमिदमत्रैव मया समाप्यते ।

---

1 श्रीविष्णुपुराणम्. १।४।५२